# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**–शास्त्री-3(SEM-6) | **प्रश्नपत्रम्** - ४ | **गुणाः** - ७० |
| **विषयः** - पौरोहित्यम् | **कोड- OE- 366** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - ०२/०४/२०१९ | **सन्दर्भग्रन्थः**- ब्रह्मनित्यकर्मसमुच्चयः । | |

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयोः व्याख्या कार्या ।** १०

१ आसिञ्चन्तु प्रजापतिर्धाता गर्भन्दधातु ते ।
गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ॥

२ अश्मा भव परशुर्भव हिरण्यमस्तुतरम्भव ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥

३ ॐ सवित्रा प्रसूता दैव्याऽआपऽउन्दन्तु ते तनूम् ।
दीर्घायुत्वाय बलाय वर्चसे त्रैण्या शलल्या विनयनम् ॥

**प्रश्नः २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** १०

१ जातकर्मसंस्कारं विलिख्य नामकर्मसंस्कारं लिखन्तु ।

२ चौलसंस्कारं विलिख्य अष्टानां संस्काराणां नामानि लिखन्तु ।

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ कयोश्चिद् द्वयोः व्याख्या कार्या ।** १०

१ भास्वान्कश्यपगोत्रजोऽरुणरुचिर्यः सिंहराशीश्वरः
षट्त्रिस्थो दशशोभनो गुरुशशीभौमेषु मित्रं सदा ।
शुक्रो मन्दरिपुः कलिङ्गजनितश्चाग्नीश्वरौ देवते
मध्ये वर्तुलपूर्वदिग्दिनकरः कुर्याद् बटोर्मङ्गलम् ॥

२ ॐ प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भव ब्रह्मसूत्रम् ।
ब्रह्मत्वसिद्ध्यै च यशःप्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम् ॥

३ देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि ।
विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे ॥

**प्रश्नः ४ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** १०

१ वेदारम्भसंस्कारं विलिख्य समावर्तनसंस्कारं लिखन्तु ।

२ विवाहसंस्कारप्रयोगं ग्रन्थानुसारेण लिखन्तु ।

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ कयोश्चिद् द्वयोः व्याख्या कार्या ।** १०

१ त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता । याचिते देहि मे तीर्थं तीर्थराज नमोऽस्तु ते ॥

२ अग्रमग्रं चरन्तीनाम् ओषधीनां वने वने । तासां वृषभपत्नीनां पवित्रं कायशोधनम् ।
यन्मे रोगांश्च शोकाँश्च पापं मे हर गोमय ॥

३ एतावद्दिनपर्यन्तं ब्रह्मत्वं धारितं मया । जीर्णत्वात्त्वत्परित्यागो गच्छ सूत्र यथासुखम् ॥

**प्रश्नः ६ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत । १०**

१ सत्यनारायणकथासारांशः सरलसंस्कृतेन लेख्यः ।

२ सत्यनारायणकथान्तर्गतपात्राणां वणिग्ब्राह्मणकलावतीलीलावतीमयूरध्वजगोपादीनां चरित्रचित्रणं वर्णयत ।

**प्रश्नः ७ दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ कौ संस्कारौ प्रथमगर्भे एव कार्यौ ?

२ प्रतिगर्भं कः संस्कारः कार्यः ?

३ षष्ठेऽष्टमे वा मासे कः संस्कारः कर्तव्यः ?

४ अन्नप्राशनसंस्कारः कस्मिन् मासे कर्तव्यः ?

५ बलायुर्वचोभिवृद्धिः केन संस्कारेण भवति ?

६ कस्मिन् वर्षे ब्राह्मणबटुम् उपनयेत् ?

७ केन मन्त्रेण माणवकः अर्घत्रयं दद्यात् ?

८ वेदारम्भे कति आहुतयः यजुर्वेदस्य भवन्ति ?

९ 'शतञ्जीव शरदः' ... अर्थं स्पष्टयतु ।

१० परिधास्येयशो..... इति मन्त्रेण वराय किं दद्यात् ?

११ सत्यनारायणकथायां कति अध्यायाः ?

१२ श्रावणीप्रयोगे कतीनाम् ऋषीणाम् आवाहनं भवति ?

१३ उपवीतं कस्य भवति ?

१४ सत्यनारायणकथायां मातृपुत्रीपात्रयोः नामनी लिखत ।

१५ श्रावणीप्रयोगः कदा कर्तव्यः ?

०००